संस्कृत-वार्ता:

02.06.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- भारतीय जनतापार्टीति दलेन अरुणाचप्रदेश: नैर्वाचनिकसमराङ्गणं विजित्य सुरक्षित:।
- प्रधानमन्त्री नरेन्द्रमोदी अद्य अत्यधिक-उष्मतया सह चक्रवातादि-सप्तविषयानवलम्ब्य सप्तोपवेशनानि आचरति।
- भारतेन क्यूबादेशाय मानवीयसहायतारूपेण औषधनिर्माणे सहायका: नवति-टन-परिमित-सामग्र्य: सन्ति सम्प्रेषिता:।
- भारतीय-ऋतु -विज्ञान -विभागेन उक्तं यत् दिल्लीं समेत्य उत्तरपश्चिमभारते प्रचलित अतितापतरङ्गे न्यूनता आयातीति।
- विंशतिं प्रति विंशति: इति वर्गस्य विश्वचषकक्रिकेटस्पर्धायां डलास इति क्षेत्रस्थे ग्रैण्डप्रेयरीक्रीडाङ्गणे प्रारंभिके खेले अमेरिकीय दलेन कनाडादेशीयं दलं सप्तक्रीडकानाम् अवशेषे विजितम्।

<u>परिणाम:/विधानसभा/अरुणाचलसिक्किम</u>

भारतीय जनतापार्टीति दलेन अरुणाचप्रदेशराज्यं नैर्वाचनिकसमराङ्गणं विजित्य सुरक्षितम्। सिक्किमक्रान्तिमोर्चा इत्याख्येन दलेनापि द्वात्रिंशंदासनेषु एकत्रिशंत् स्थानानि विजित्य सिक्किमप्रदेशे पुनरेकवारं सत्ता प्राप्ता। उभयो: पूर्वोत्तरीयराज्ययो: विधानसभा-निर्वाचनस्य अद्य मतगणना आसीत्। उभयत्र हि एकोनविंशे अप्रैलमासे मतदानमासीत्। यत्र अरुणाचलप्रदेशे षष्टि:आसन्दानि आसन्, तत्रैव सिक्किमे द्वात्रिंशत् आसन्दानि आसन्। अरुणाचलप्रदेशे च भाजपेति दलेन दश आसनेषु निर्विरोधतया निर्वाचनपुरस्सरम् आहत्य षड्चत्वारिंशत्स्थानानि सन्ति सुरक्षितानि।

<u>प्रधानमन्त्री-उपवेशनम्</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य अत्यधिक-उष्मतया सह चक्रवातादि-सप्तविषयानवलम्ब्य उपवेशनानि आचरति। सूत्रानुसारि प्रथमोवेशने पूर्वोत्तरराज्येषु आगतस्य चक्रवातस्य स्थिते: समीक्षा क्रियते। अन्यैकोपवेशने राष्ट्रे उत्कट-घर्मस्य समीक्षा समाचरिष्यते। श्रीमोदी विश्वपर्यावरणदिवस्य व्यापकतया समायोजनमभिक्ष्य अपि एकस्य समीक्षोपवेशनस्य आयोजनं करोति। प्रधानमन्त्री संघट्यमानस्य नूतनप्रशासनस्य शतदिवसीयकार्य-योजनामभिलक्ष्यापि उपवेशनमेकं समायोजयति।

## क्यूबा-सहाय्यम्

भारतेन क्यूबादेशाय मानवीयसहायतारूपेण औषधनिर्माणे सहायका: नवति-टन-परिमित सामग्र्य: सन्ति सम्प्रेषिता:। एता: सामग्र्य: गुजरातस्य मुन्द्रा सागरीय-पोत-स्थानकात् प्रस्थिता:। विदेशमन्त्रालयस्य प्रवक्त्रा रणधीरजायसवालेन समाजिकसञ्चारतन्त्रजाले उक्तं यत् एषा सहायता प्रमुख-औषधापूर्तिकर्तृ-देशरूपेण भारतस्य परिचय: विश्वफलके कारयिष्यति। सहैव हि एषा सहायता क्यूबा-भारतयो: सम्बन्धान् प्रति प्रतिबद्धतामपि दर्शयतीति।

## परिणाममभिलक्ष्य सुरक्षा

भारत-निर्वाचनायोगेन निर्वाचनानन्तरं कथमपि हिंसा न भवेदिति उद्दिश्य राज्येभ्य: केन्द्रीयसुरक्षाबल-दलानि संदत्तानि सन्ति। आयोगेन निर्णयोऽयं राज्यपर्यवेक्षकै:सह केन्द्रीय-पर्यवेक्षकानाम् समाकलनानन्तरं कृतोऽस्ति। आन्ध्रप्रदेश पश्चिमबङ्गालयो: मतगणनाया: पञ्चदशदिवसान्तं यावत् सुरक्षाबलानि स्थास्यन्तीति अस्ति निर्णय: आयोगस्य।

## रेलयानदुर्घटना

पञ्जाबप्रान्तस्य फतेहगढ-साहिब इत्यत्र अद्य पप्रात: लुधियाना-अम्बाला-मुख्यरेलमार्गे द्वे भारवाहके रेलयाने दुर्घटनाग्रस्ते अभवताम्। अस्मत्वार्ताहरेण प्रोक्तं यत् अनया दुर्घटनया एकपञ्चाशत् रेलयानानि वाधितानि अजायन्त, सप्त च निरस्तीकृतानि अभवनिति।

## विपक्षस्य उपवेशनम्

मङ्गलवासरे जायमानाया: लोकसभानिर्वाचनस्य मतगणनाया: प्राक् विपक्षस्य इण्डिया घटबन्धनेन परह्य: नवदिल्ल्यां एकम् उपवेशनं कृतम्, तत्रस्थै: नेतृभि: पञ्चनवत्यधिक-द्विशतम् लोकसभासनेषु जयं अधिगमिष्यन्ति इति विश्वास: प्रकटित:। उपवेशनेऽस्मिन् कांग्रेसदलप्रमुख: मल्लिकार्जुनखड़गे, श्रीराहुल गांधी, केसीवेणुगोपाल अन्ये च नेतार: आभासीयमाध्यमेनापि सम्मिलिता: अभवन्।

आईएमडी-ॠतु

भारतीय-ॠतु-विज्ञान-विभागेन उक्तं यत् दिल्लीं समेत्य उत्तरपश्चिमभारते प्रचलित अति तापतरङ्गे न्यूनता आयातीति। विभागेन उक्तं यत् देशस्य उत्तरपश्चिम-मध्यभागेषु अपि च ओडिशायाः केषुचित् स्थानेषु अद्य तापतरङ्गः इतोपि संवर्धिष्यति। आकाशवाण्या सह वार्तालापं कुर्वन् ॠतुवैज्ञानिक: आर.के. जेनामणि: अवदत् यत्, दिल्लीं समेत्य उत्तरपश्चिमभारते तापमानं क्रमेण न्यूनं भवति। श्रीजेनामणि: एतत् समुल्लेखयन् अवदत् यत् पाश्चिम-विक्षोभः वातावरणं प्रभावितं करोतीति येन कारणेन तापमाने इतोपि न्यूनता आयातीति। सः अवदत् यत् पश्चिमविक्षोभस्य प्रभावेण दिल्ल्या सहैव देशस्य उत्तर-पश्चिम-क्षेत्रेष्वपि जूनमासस्य चत्वारत: षड्-दिनाङ्कं यावत् वज्रपातपुरस्सरं विद्युत्-वायुभ्यां सह वृष्टेः संभावना अपि विद्यते। भारतीय-ॠतु-विज्ञान-विभागेन आगामिषु त्रि-चतुर्दिनेषु पूर्वोत्तरभारतस्य दक्षिणप्रायद्वीपीयभारतस्य च पृथक् पृथक् क्षेत्रेषु अतिवृष्ट्याः अपि संभावना प्रकटितास्ति। आगामिषु चतुर्दिनेषु अरुणाचलप्रदेश, असम, मेघालय, उपहिमालयीय पश्चिमबङ्ग, सिक्किम इत्येतेषु स्थानेषु प्रचण्डवृष्टेः आत्यन्तिकी सम्भावना वर्तते तथा च सोमवासरे मंगलवासरे च मणिपुरे अतिवृष्टिः अपि भवितुं शक्नोतीति।

मुष्टामुष्टी

मुष्टामुष्टीक्रीडायां भातीयक्रीडक: अमितपंगल: पेरिस-ओलम्पिकस्पर्धायै पुरुषाणाम् एकपञ्चाशत् किलोग्रामभारवर्गे स्वकीयं स्थानं रक्षितवान्। तेन बैंकोकनगरे चीनदेशस्य लियू चुआंग इत्यसौ पराजित:। अमित: पञ्चम: भारतीय: मुष्टामुष्टीक्रीडक: अस्ति, इत: पूर्वं निशान्तदेव-निखतज़रीन-प्रीतिपवार-लॉवलीना-बॉरगुहाई इति चत्वार: क्रीडका: क्रीडिकाश्च पूर्वमेव अस्मै क्रीडाकुम्भाय सन्ति चयनिता:।

क्रिकेट

विंशतिं प्रति विंशति: इतिवर्गस्य विश्वचषकक्रिकेटस्पर्धायां डलास इति क्षेत्रस्थे ग्रैण्डप्रेयरीक्रीडाङ्गणे प्रारंभिके खेले अमेरिकीय दलेन कनाडादेशीयं दलं सप्तक्रीडकानाम् अवशेषे विजितम्। कनाडादेशीयेन दलेन पञ्चक्रीडकानां हानौ षडोनद्विशतधावनाङ्का: विनिर्मिता:, आतिथेयेन देशेन च द्वयो: कन्दुकप्रक्षेपचकयो: अवशेषे एव पञ्चनवत्युत्तरैकशतं धावनाङ्का: विनिर्मिता:। तत्रैव गतरात्रौ अभ्यास-क्रीडायां भारतेन बांगलादेश दल षष्ठी धावनांकै: पराजिताम् आयरलैण्ड दलं विरुध्य क्रीडिष्यति।

।। इति वार्ता: ।।